# प्रास्ताविकम्-

—:०:—

इदं षोडशर्चं पुरुषसूक्तमल्पमप्यनल्पमाहात्म्यम्। किमदस्य माहात्म्यमिति नामैष कथयति यत्पुरुषः परमात्मैवास्मिन्सूक्ते शोभनतयोक्तः। किंच प्राचीनार्याणां वैदिकमार्गानुसारिणां जीवेश्वरजागतपदार्थसंबन्धेन किं मतं, सर्गस्थाननिरोधकल्पनाऽपि कीदृशी, गुणकर्मविभागशो वर्णाश्रमव्यवस्था च कथं, को नु खल्वीश्वराराधनात्मको मुख्यो यज्ञः, किंच दृष्टादृष्टं ज्ञाताज्ञातं व्यक्ताव्यक्तं यदिदं सर्वं तत्किमस्ति तर्हि परमात्मापरपर्यायो मायाकल्पितपञ्चविधभेदोऽपि वस्तुतो निरस्ताखिलद्वैतप्रपञ्चः समष्टिव्यष्ट्यात्मको विराडाख्यः परमपुरुष एवेतीदृशो महान्राद्धान्तः सूत्रप्रायेणापि सरलान्वयसुबोधपदविन्यासेन सूक्तेनानेन प्रकाशतामापन्नः। अस्योपरि बह्व्यो व्याख्याः पण्डितैर्विहितास्तासु जगत्प्रसिद्धस्य श्रीमतः सायणाचार्यस्यैव भाष्यं संप्रति प्रकाश्यते। श्रीमत्सायणाचार्यस्येतिवृत्तं तु रुद्राध्यायप्रस्तावनासमये वर्णितमेवेति तत्रैव द्रष्टव्यमित्यभ्यर्थना।

अस्य भाष्यस्याऽऽदर्शपुस्तकानि एवंविधानि-

क.-पुण्यपत्तननिवासिभिर्महादेव चिमणाजी आपटे इत्येतैर्दत्तम्। ख.-वटोदरानिवासिश्रीमत्कृष्णराय भीमाशंकर पटवर्धन इत्येतैः प्रेषितम्। संवत् १९०६ रौद्रनामसंवत्सरे शके १७७१ सौम्यनामसंवत्सर उदगयने हेमन्तर्तौ मार्गशीर्षशुक्लपक्षे चतुर्थ्यामिन्दुवासर इदं पुस्तकं लिखितम्। ग.-श्रीमद्भिः, भाऊ महाराज इत्येतैर्दत्तम्। घ. ङ.-श्रीमद्भिः, किबे साहेब इत्येतैः प्रेषिते।

च. संज्ञितं—श्रीमद्भिः, रावसाहेब विञ्चुरकर इत्येतैः प्रेषितम्।

इत्येभिर्महाशयैः सज्जनैरस्मिन्कर्मण्यादर्शपुस्तकसाहाय्यवितरणेन बहूपकृतमित्यवश्यं कथनीयम्। एतानि पुस्तकान्याकलय्य प्रकृतभाष्यशोधनादिकं यथामति कृतम्। इति सविनयमभ्यर्थयते -

दामले इत्युपनामधेयः केशवशास्त्री।

---

98192
26/7/2000